कमण्डलुकरो मोक्ष इति मां समयाचत । ततो मया भर्त्सितः स कुटजान्तरलीनया । प्रच्याव्य तेजः स गतो मम शापभयार्दितः । कुरु तत्र प्रतीकारं यदि शक्नोषि शान्तनो ! । न हि तां धर्षणां सोढुं कश्चित् शक्नोति जीऽभवत् । स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागतः । इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत् । दिव्यज्ञानेन स ज्ञात्वा देवकार्य्यमुपस्थितम् । तीर्थावतारणञ्चापि हिताय जगतां मुनिः । ज्ञात्वोदर्कं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत् । इदं तेजो ब्रह्मणस्त्वं पिबामोघे ! ममाज्ञया । हिताय सर्वजगतां देवकार्य्यार्थसिद्धये । भवत्या निकटे ब्रह्मा स्वयमेव समागतः । त्वामप्राप्य स महात्मा आवयोः स समर्प्य च । गतो निजास्पदं तत्त्वं कर्त्तुमर्हसि मद्वचः । तत् श्रुत्वा शान्तनोर्वाक्यममोघातीव लज्जिता । सान्त्वयन्तीव तं प्राह पतिं नत्वा महासती । नान्यस्य तेजो धास्यामि न चेत्ते विमनस्कता । अवश्यं यदि कर्त्तव्यं पीत्वा त्वं मयि चोत्सृज । ततस्तस्या वचः श्रुत्वा युक्तं तथ्यञ्च शान्तनुः । स्वयं पीत्वा च तत्तेजस्तस्या गर्भेऽभ्यषेचयत् । संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मणः सती । गर्भं दधारामोघाख्या हिताय जगतां ततः । तस्यां काले तु संप्राप्ते संजातो जलसञ्चयः । तन्मध्ये तनयश्चापि नीलवासाः किरीटधृक् । रत्नमालासमायुक्तो रक्तगौरश्च ब्रह्मवत् । चतुर्भुजः पद्मविद्यावरशक्तिधरस्तथा । शिशुमारशिरस्थश्च तुल्यकायो जलोत्करैः । तं जातञ्च तथाभूतं शान्तनुर्लोकशान्तनुः । चतुर्णां पर्वतानाञ्च मध्यदेशे न्यवेशयत् । कैलासस्योत्तरे पार्श्वे दक्षिणे गन्धमादनः । जारुधिः पश्चिमे शैलः पूर्वे संवर्त्तकाह्वयः । तेषां मध्ये स्वयं कुण्डं पर्वतानां विधेः सुतः । कल्पाऽतिववृधे नित्यं शरदीव निशाकरः । तं तोयमध्यगं एत्यासाद्य द्रुहिणः स्वयम् । क्रमतस्तस्य संस्कारानकरोद्देहशुद्धये । अथ काले बहुतिथे व्यतीते ब्रह्मणः सुतः । तोयराशिस्वरूपेण ववृधे पञ्च योजनान् । तस्मिन् देवाः पपुः सस्नुर्द्वितीय इव सागरे । शीतामलजले ह्रद्ये देव्याप्सरसां गणैः । तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान् । चक्रे मातृवधं घोरमत्युग्रं पितुराज्ञया । तस्य पापस्य मोक्षाय स्वपितुश्चोपदेशतः । स जगाम महाकुण्डं ब्राह्माख्यं स्नातुमिच्छया । तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् । वीथिं परशुना कृत्वा तस्य ब्रह्ममवातारयत्” तदुत्तरत्र “ब्रह्मकुण्डात् सृतः सोऽथ कासारे लौहिताह्वये । कैलासोपत्यकायान्तु न्यपतद् ब्रह्मणः सुतः । तस्यापि सरसस्तीरं समुत्पाद्य महाबलः । कुठारेण दिशं पूर्वामनयद्ब्रह्मणः सुतम् । ततोऽपरत्रापि गिरिं हेमशृङ्गं विभिद्य च । कामरूपान्तरं पीठमवाहयदसुं हरिः । तस्य नाम विधिश्चक्रे स्वयंलौहितगङ्गकम् । लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽभवत् । स कामरूपमखिलं पीठमाप्लाव्य वारिणा । गोपयन् सर्वतीर्थानि दक्षिणं याति सागरम् । प्रागेव दिव्ययमुनां संत्यज्य ब्रह्मणः सुतः । पुनः पतति लौहित्ये गत्वा द्वादशयोजनम् । चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः । स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् । चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः । लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात्” कालिकापु० ८४.८५ अ० “मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम् । पिबेदशोककलिकाः स्नायाल्लौहित्यवारिणि । पुनर्वसौ वृषे लग्ने चैत्रे मासि सिताष्टमीम् । लौहित्ये विरजे स्नायात् सर्वपापैः प्रमुच्यते” ति० त० ।

**ब्र(व्र)ह्मपुर** न० ६त० । १ब्रह्मण उपासनार्थे हृदयस्थाने “अथ यदिदं ब्रह्मपुरे दहरं पुण्डरीकम्” छा० उ० । दहरशब्दे ३५१० पृ० दृश्यम् । “यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः” मुण्डकोप० । “ब्रह्मणोऽत्र चैतन्यस्वरूपेण नित्याभिव्यक्तत्वाद्ब्रह्मणः पुरं हृदयपुण्डरीकं तस्मिन्” भा० । २विधातृनगर्य्यां ३काश्याञ्च वा स्त्री ङीप् तत्रार्थे । वृ०सं०१४अ०उक्ते ऐशानदिकस्थे ४देशभेदे पु० (वरमा) देशे स्वार्थे क । तत्रार्थे मार्क०पु० पूर्वोत्तरकूर्मभागस्थदेशोक्तौ ।

**ब्र(व्र)ह्मपुराण** न० वेदव्यासप्रणीते महापुराणभेदे तत्प्रतिपाद्यविषयाश्च वृहन्नारदीये ४पा० ९२अ० उक्ता यथा “ब्रह्मं पुराणं तत्रादौ सर्वलोकहिताय वै । व्यासेन वेदविदुषा समाख्यातं महात्मना । तद्वै सर्वपुराणाग्र्यं धर्मकामार्थमोक्षदम् । नानाख्यानेतिहासाढ्यं दशसाहस्रमुच्यते” तत्पूर्वभागे “देवानामसुराणाञ्च यत्रोत्पत्तिः प्रकीर्त्तिता । प्रजापतीनाञ्च तथा दक्षादीनां मुनीश्वर ! । ततो लोकेश्वरस्यात्र सूर्य्यस्य परमात्मनः । वंशानुकीर्त्तनं पुण्यं महापातकनाशनम् । तत्रावतारः कथितः परमानन्दरूपिणः । श्रीमतो रामचन्द्रस्य चतुर्व्यूहाव-